चार्वाकाणामीश्वरनिराकरणरीतिः
CĀRVĀKĀṆĀMĪŚVARANIRĀKARAṆARĪTIḤ

Dr. O.R. Vijayaraghavan

Abstract

Attaining *mokṣa* is the prime aim of all the systems of Indian philosophy. For this almost all the systems discuss about the creation and destruction of the world, God etc. Even the Heterodox systems discuss about the refutation of God. In this article the Cārvāka views on refutation of God is discussed.

सुप्रसिद्धोऽयं विषयः चार्वाकाः नास्तिका इति। एते पृथिव्यादिभूतचतुष्टयात् देहाकारपरिणतेः चैतन्यस्य उत्पत्तिमत्वमभ्युपगच्छन्तः चैतन्यविशिष्टदेहस्यैव आत्मत्वमङ्गीकुर्वन्ति। तदुक्तं –

तथा च लोकायतिकाः परलोकापवादिनः
चैतन्यखचितात् कायात् नात्मान्योऽस्तीति मन्वते।।[1]

इति। देहातिरिक्तात्मन्यविश्वस्तैरेतैः ईश्वरोऽपि न विश्वस्यते प्रमाणाभावात्। तस्य चेश्वरस्य शरीराद्यभावेनाप्रत्यक्षत्वात् प्रत्यक्षेतराणां प्रामाण्यानभ्युपगमाच्च।

ननु तत्कथं प्रत्यक्षेतराणामनुमानादीनामप्रामाण्यं, धूमप्रत्यक्षेण वह्नि-ज्ञानसिद्धेः अनुभवात् इति चेत्, नैयायिकैः पञ्चावयवसंभूतस्य परार्थानुमानस्य प्रामाण्यम् अभ्युपगम्यते। तद्यथा पर्वतो वह्निमान् धूमात्– यो यो धूमवान् स स वह्निमान् यथा महानसः- तथा चायं- तस्मात् तथा इति। अनुमानञ्च हेतुसाध्ययोः व्याप्त्यधीनं भवति। लिङ्गभूतेन साधनेन धूमेन साध्यस्य वह्नेः विद्यमानत्वं सिद्ध्यति। तेन च पक्षवृत्तिना भाव्यम्। तत्र हेतुः साध्यसहचारी व्याप्तिमान् उपाधिरहितश्च भवेत्। व्याप्तेश्च स्वसद्भाव -मात्रेण नानुमितिकरणत्वम्, अपि तु व्याप्तिज्ञानमेव करणम् ।

एवं सत्यनुमानमूलायां व्याप्तौ प्रमाणं किम्? तन्न बाह्यान्तरीक-प्रत्यक्षाभ्यां भवति। तथा हि- न तावत् प्रथमात्, बाह्यप्रत्यक्षस्य विषये-न्द्रियसंयोगजत्वात्, भूतभविष्यद्विप्रकृष्टानां सर्वेषां

तदभावात्, व्याप्तेः सर्वोपायत्वात्, सकलसाध्यसाधनानां प्रत्यक्षस्य चाशक्यत्वात्। न चव्याप्तिज्ञानं साध्यसाधनगतसामान्यज्ञानेन भविष्यति, जातेरप्रत्यक्षत्वात्, अविनाभावनिश्चया-भावाच्च। वस्तुतः सामान्यं नाम न किञ्चिन अस्त्येव। न वा आन्तरिकेण तत्सिद्धिः, अन्तःकरणस्य बाह्यार्थेऽस्वातन्त्र्यात्। तदुक्तम्- "तस्य (बाह्यप्रत्यक्षस्य) संप्रयुक्तज्ञानजनकत्वेन भवति प्रसरसंभवेऽपि भूतभविष्ययोः तदसंभवेन सर्वोपसंहारवत्याः व्याप्तेः दुर्ज्ञानत्वात्। न च व्याप्तिज्ञानं सामान्यगोचरमिति मन्तव्यम्, व्याप्यव्यापकयोरविना-भावाभावप्रसङ्गात्। अन्तः करणस्य बहिरिन्द्रियतन्त्रत्वेन बाह्येऽर्थे स्वातन्त्र्येण प्रवृत्यनुप-पत्तेः"[2] इति।

तत्रानुमानं न प्रणाणं– न चानुमानं प्रमाणं व्याप्तिज्ञानस्य, अनवस्था-दोषप्रसङ्गात्। एकस्या व्याप्तेः अन्यव्याप्तिमूलत्वात् अन्यस्या अन्यापेक्षेत्यनवस्थादोषः। नापि शब्दः व्याप्तिज्ञानप्रमाणं भवितुमर्हति, तस्य अनुमान एवान्तर्भावाभ्युपगमात् वैशेषिकैः। अनन्त-र्भावेऽपि न प्रमाणम्, आप्तवाक्यस्यैव प्रामाण्यात्, पदपदार्थयोः ज्ञानयोः व्याप्त्यधीनत्वाच्च। नाप्युपमानं तत्र प्रमाणं, तस्य संज्ञासंज्ञिसंबन्धाधारत्वात्। किञ्च तस्य अन्योच्चरितत्वेनैव प्रमाणत्वात् पदपदार्थयोः ज्ञानायोः व्याप्त्याश्रितत्वात् तत् प्रमाणं, अतः न केनापि प्रकारेण व्याप्तिज्ञानसिद्धिः।

अपि च व्याप्त्या उपाधिरहितया भाव्यम्। व्याप्तौ एकस्यां न सर्वोपाध्यभावः ज्ञातुं शक्यते। न तेषां प्रत्यक्षत्वमपि, अप्रत्यक्षाणामभावस्याप्यप्रत्यक्षत्वात्। न तेषां ज्ञानं अनुमानो-पमानशब्दैः भवितुं शक्यं, पूर्वोक्तदूषणानां पुनः प्रसङ्गात्। किञ्चोपाधिज्ञानं व्याप्तिज्ञानाधीनं, व्याप्तिज्ञानं चोपाध्यभावज्ञानाश्रितं, तच्चोपाधिज्ञानाधीनमिति अन्योन्याश्रयप्रसङ्गश्च। अतः अनुमानमूलायाः व्याप्तेः ज्ञानाभावात् नानुमानं प्रमाणम्। तदुक्तं- "उपाधीनां प्रत्यक्षत्वनियमा-संभवेन, प्रत्यक्षाणाम् अभावस्य प्रत्यक्षत्वेऽपि, अप्रत्यक्षाणामभावस्याप्रत्यक्षत्वात् अनुमाना-द्यपेक्षायामुक्तदूषणानिवृत्तेः। तत्र विध्यध्यवसायपूर्वकत्वात् निषेधाध्यावसायस्य उपाधिज्ञाने जाते तदभावविशिष्टसंबन्धरूपव्याप्तिज्ञानं, व्याप्तिज्ञानाधीनं चोपाधिज्ञानमिति परस्पराश्रयवज्र-प्रहारदोषो वज्रलेपायते। तस्मादविनाभावस्य दुर्बोधतया नानुमानाद्यवकाशः"[3] इति।

अपि च व्याप्तिः भूयोदर्शनेन प्रतिष्ठिता भवति। गते काले साध्य-साधनयोः युगपत् दर्शने जातेऽपि भाविकाले कदाचिन्न दृश्येत। तेन व्याप्तिरपि न भवेत्। अतो भूयोदर्शनेन न प्रतिष्ठिता भवेत्। हेतुसाध्ययोः व्याप्तिश्च न सर्वत्र सर्वदा द्रष्टुं शक्या। यदि सर्वत्र न दृष्टा तयोः व्याप्तिः, तदा शङ्का जायेत साध्याभावेऽपि साधनं भवेदिति। यद्यपि तयोः युगपद्दर्शनं बहुत्र जातं, तथापि तयोः भावः न सर्वत्र दृष्टः। सर्वत्र वह्न्यभाववति धूमाभावश्च प्रत्यक्षीकर्तुं न शक्यते। अतः साध्यसाधनयोः व्याप्तिः न प्रत्यक्षसिद्धा । तदुक्तं –

भूयोदर्शनगम्यापि न व्याप्तिरवगम्यते।
सहस्रशोऽपि तद्दृष्टे व्यभिचारावधारणात्॥

बहुकृत्वोऽपि वस्त्वात्मा तथेति परिनिश्चितः।
देशकालादिभेदेन दृश्यते पुनरन्यथा॥
भूयो दृष्ट्वा धूमोऽग्निसहचारीति गम्यताम्।
अनग्नौ स नास्तीति न भूयोदर्शनाद्गतिः॥[4]
अतो नानुमानस्य प्रमाणता।

शान्तरक्षितेन तत्वसंग्रहाख्ये ग्रन्थे अनुमानप्रमाणनिरूपणे पूर्वपक्षेणोद्धृतचार्वाक-मतस्याभिप्राय एवम्- न स्वार्थानुमानं प्रमाणं, त्रिरूपलिङ्गपूर्वत्वात्, मिथ्याज्ञानवत्। चक्षुरादयः परार्थाः सङ्घातत्वात् शयनासनाद्यङ्गवत्। इदमनुमानं त्रिरूपलिङ्गपूर्वत्वेऽपि दुष्टमेव। तत्र हेतोः पक्षवृत्तित्वं, साध्यवति स्थले वृत्तित्वं, तदभावस्थलेऽभावश्च विद्यत एव। तथाप्यनुमानं दुष्टं, प्रत्यक्षबाधात् इति सिद्धम्।

न त्रैरूप्यमनुमितिकरणम्, अननुमानस्थलेऽपि तस्य वृत्तित्वात्, रूप्यत्वात्। अपि च सर्वत्र साधनेऽनुमानविरोधः संभवतिविवक्षितसाध्यधर्मो न धर्मिविशेषणम्, एतत्समुदायैकदेशत्वात् इत्यनुमानेन सर्वेषामपि हेतूनां दुष्टत्वं संभवति।

अनुमानस्यैकस्यान्येन विरुद्धतां प्रतिपादयितुं शक्यते, यथा शब्दोऽनित्यः कृतकत्वात् घटवदिति चेत्, शब्दः नित्य आकाशगुणत्वात् इति प्रत्यनुमानेन विरुद्धता, शब्दः नित्यः श्रावणत्वात्, शब्दत्ववत् इत्यनुमानेन व्यभिचारित्वञ्च संभवति। अतः न स्वार्थानुमानं प्रमाणम्। तदुक्तं–

त्रिरूपलिङ्गपूर्वत्वात् स्वार्थं मानं न युज्यते।
इष्टघातकृताञ्जन्यं मिथ्याज्ञानं यथा किल ॥
भावादननुमानेऽपि न चानुमितिकारणम्।
द्वैरूप्यमिव लिङ्गस्य त्रैरूप्यं नास्त्यतोऽनुमा ॥
अनुमानविरोधस्य विरुद्धानाञ्च साधने।
सर्वत्र संभवात् किञ्च विरुद्धाव्यभिचारिणः॥[5]

इति। परार्थानुमानमपि वक्त्रपेक्षयानुवादत्वान्न प्रमाणम्। श्रोत्रपेक्षया तु तत् स्वार्थमेव। यथा चक्षुषो व्यापारे सति न परार्थव्यपदेशः, तथा श्रोत्रव्यापारेऽपि। तथा च श्रोत्रपेक्षया वचनस्य न परार्थानुमानत्वं, श्रोतृसन्तानवर्तिज्ञानहेतुत्वात् ज्ञापकत्वाच्च इन्द्रियवत् इति। अपि च अविनाभावसंबन्धज्ञानवत् साक्षादनुमेयाप्रकाशकत्वादपि न परार्थानुमानत्वं वचनस्य श्रोत्रपेक्षया।

परव्यापारापेक्षया तस्य परार्थत्वमिति चेन्न, स्वार्थेऽपि परार्थत्वप्रसङ्गात्,अपेक्षितत्वात् परत्वस्य पारावारवत्। तदुक्तं–

परार्थानुमानं तु न मानं वक्त्रपेक्षया।
अनुवादान्न तेनासौ स्वयमर्थं प्रपद्यते।।
श्रोतृव्यपेक्षयाप्येतत् स्वार्थमेवोपपद्यते।
श्रोत्रदर्शनमूलायाः को विशेषो हि संविदः।।
न परार्थानुमानत्वं वचसः श्रोत्रपेक्षया ।
श्रोतृसन्तानविज्ञानहेतुत्वज्ञापकत्वतः।।
यथेन्द्रियस्य साक्षाच्च नानुमेयप्रकाशनम्।
तस्मादस्याविनाभावसंबन्धज्ञानवन्न तत्।।
अथोच्यते परार्थत्वं परव्यावृत्यपेक्षया ।
तदप्ययुक्तं स्वार्थेऽपि परार्थत्वप्रसङ्गतः।।[6] इति।।
अतो न स्वार्थस्य परार्थस्यानुमानस्य प्रामाण्यम्।

पुरन्दरनामकेन चार्वाकेण लौकिकानुमानस्वीकारेऽपि अलौकिकानुमानस्वीकारे न सम्मतिः प्रदर्शिता। "पुरन्दरस्तूक्तम्– लोकत्रासिद्धमनुमानं चार्वाकैरपीष्यत एव। यस्तु कैश्चिल्लौकिकमार्गम् अतिक्रम्यानुमानमुच्यते, तन्नि-षिध्यत"[7] इति वचनात्।

परन्तु इतरैः चार्वाकैः उभयविधस्याप्यनुमानस्य प्रामाण्यं नेष्यत एव। यद्येवं धूमादिज्ञाना-नन्तरं वह्न्यादिज्ञानात् वह्न्याद्यर्थे प्रवृत्तिः कथमिति चेत्, पूर्वं बहुशः प्रत्यक्षेण दृष्टत्वम्, भ्रान्त्याऽथवा भवेत्। क्वचिच्च मणिमन्त्रौषधिवत् यादृच्छिकः। नाप्यनुमानशब्दयोः प्रामाण्यं, तयोः व्याप्त्यधीनत्वात्। अत ईश्वरसिद्धौ प्रत्यक्षप्रमाणाभावात् नेश्वरसिद्धिः।

ननु वेदाः प्रमाणमीश्वरसिद्धौ, तेन विना तेषामुत्पत्यसंभवात्। वेदकर्तृत्वं न चास्मदादीनाम्, असर्वज्ञत्वात्। अतः वेदकर्तृत्वेन सर्वज्ञ ईश्वरः अभ्युपगन्तव्य इति चेत्, उच्यते– न अस्माभिः बार्हस्पत्यानुयायिभिः वेदस्य प्रामाण्यमभ्युपगम्यते, तस्य अनृतत्वात्, व्याघातत्वात्, पुनरुक्ति-दोषघटितत्वाच्च। तदुक्तं– "तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः"[8] इति।

तद्यथा– "चित्रया यजेत पशुकामः", "पुत्रकामः पुत्रेष्ट्या यजेत" इति श्रूयते। परन्तु इष्टिसमनन्तरं पुत्रपश्वादिकं नोपलभ्यते। तेनानृतत्वं वेदस्य सिद्ध्यति। न च कालान्तरे तद्भवतीति वाच्यम्, कर्मणां समनन्तरफलत्वेन लोके दृष्टत्वात्। अपि च कालान्तरे कर्मणः प्रध्वंसात् फलं कथं भवेत्। सत्यपि फले कालान्तरे तस्य कारणमन्यद्भवेत्। न चादृष्टद्वारा तन्निर्वहतीति वाच्यम्, तत्सिद्धावेव प्रमाणाभावात्। अतो वेदस्यानृतत्वं सिध्यति।

एवमग्निहोत्रादीनां वेदैकदेशत्वात् मिथ्यात्वं, चित्रादिचोदनावत् इत्यसंवादः, प्रमिते यजमानस्य स्वर्गगमकत्वं श्रूयते, तत्रात्मनो निर्देशः क्लिष्टः परोक्षत्वात्। कायस्य न स्वर्गप्राप्तिः, तद्विपरीतभस्मीभावोपलम्भात् इति विसंवादश्च। अतः असंवादसंवादाभ्यां न प्रमाणं वेदः। एवम् "उदिते होतव्यम्", "अनुदिते होतव्यम्", "समयाभ्युहिते होतव्यम्" इति होमकालत्रयमपि

विधाय पुनः कालत्रयस्यापि निषेधः क्रियते। न चार्थवादमात्रमिति वक्तव्यं, यतः -न चात्र न हि निन्दान्यायो युज्यते, कालत्रयस्यापि निषेधात् कस्य प्रशंसा विधीयत इति। अतः परस्पर-विरुद्धार्थोपदेशत्वात् व्याघातादप्रमाणं वेदः।

बाधितार्थबोधकत्वमपि क्वचित् दृश्यते। "उत्थाना वै देवगावो वहन्ती" इति श्रूयते। न हि गावः उत्थानागच्छन्त्यः दृश्यन्त इति बाधितार्थबोधकत्वम्। पौनरुक्त्यमपि वेदे दृश्यते। "त्रिप्रथमामन्वाह त्रिरुत्तमम्" इति प्रथमोत्तमयोः त्रिरुक्तत्वश्रवणात् पौनरुक्त्यं, सकृदुच्च-रितत्वेनैव प्रयोजनसम्पत्तेः त्रिर्वचनानर्थक्यम् इति पौनरुक्त्यदोषात् वेदाः अप्रमाणम्।

अपि च ईश्वरसिद्धौ तदुक्तत्वात् वेदाः प्रमाणम्, ईश्वरसिद्धिश्च प्रमाणवेदकर्तृत्वेन इति अन्योन्याश्रयदोषोऽपि, अतोऽप्रमाणं वेदाः। ततश्च वेदकर्तृत्वेन नेश्वरसिद्धिः। अपि च दृश्यते वेदः जीविकार्थम्। भण्डैः, धूर्तैः निर्मितः इति। तदुक्तम् –

त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः।
जर्भरी तुर्फरीत्यादि पण्डितानां वचः स्मृतम्।।
अग्निहोत्रं त्रयो वेदाः त्रिदण्डं भस्मकुण्डनम्।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः।।[9]

अथ वेदकर्तृत्वेन अनभ्युपगमेऽपि क्षित्यादीनां कर्तृत्वेन ईश्वरोऽभ्युपगन्तव्य एव, तेषां कार्यत्वादिति चेन्न, कार्यकारणभावस्यैव अनभ्युपगमात्। कार्यकारणयोश्च मध्ये संबन्धः कल्पित एव। कार्यस्य कारणस्य च युगपत् बहुधा दृष्टत्वात् अस्यायं कारणमिति मतिः भ्रान्तिरेव। उभयोरपि साहचर्यं बहुधा दृष्टमपि कदाचित् कालान्तरे न स्यात्। तदुक्तं– "शतकृत्वोऽपि तद्दृष्टौ व्यभिचारस्य संभवात्"[10] इति। अतः कार्यकारणभाव एव नास्ति। तेन चेश्वरसिद्धिः नास्त्येव।

अथ कथमस्य जगतः स्थित्यादिकमिति चेत्, स्वाभाविकमेवेति ब्रूमः। तदुक्तं--

अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः।
केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिः।।[11] इति।

अतः चार्वाकाणां प्रत्यक्षमेकं प्रमाणम्। यत् प्रत्यक्षं तस्य वृत्तित्वं, यन्न प्रत्यक्षं तस्यासत्वं चाभ्युपगच्छन्ति। अप्रत्यक्षभूतस्यापि सद्भावाङ्गीकारे निर्धनी कश्चन स्वकल्पनयैव निर्धनिकाताम् अपाप्स्यताम्। एतत्तु लोकविरुद्धम्। तदुक्तं- किञ्चाप्रत्यक्षमप्यस्ति, तथाप्युपगम्यते चेत् जगदद्भुतमेव स्यात्, स्वर्गराशीः मे अस्तीत्यनुसन्धाय हेलयैव दुःसत्यं दलयेत् इति। अतः प्रत्यक्षमेकं प्रमाणम्। परिदृश्यमानं जगदेव एकं तत्वम्। पञ्चेन्द्रियैः प्रत्यक्षमानानामेव वास्तविकत्वम्। प्रत्यक्षबाह्यानां न सत्यत्वम्। अतः इन्द्रियगोचर-

विषयपूर्णमिदं जगत्। तदुक्तं- एतावानेव "लोकोऽयं यावानिन्द्रियगोचरः"। पञ्चप्रकारदृष्टमेव वस्तु तत्वं प्रमाणपदवीमवगाहते इति। अतः प्रत्यक्षेतरस्य सद्भावे प्रमाणाभावात् नेश्वरसिद्धिः।

केचित्तु चार्वाकैकदेशिनः प्रत्यक्षसिद्धस्य राज्ञः ईश्वरत्वं मन्यन्ते। लोकसिद्धो राजा परमेश्वरः, "लोकसिद्धो भवेद्राजा परेशो नापरः स्मृतः"[12] इति वचनात्।

एवमुपसंहारः- अर्थकामावेव पुरुषार्थं मन्यमानानां परलोकमपह्नुवानानां प्रत्यक्षेतरस्य प्रामाण्यमनभ्युपगन्तृणाम् अनृतत्वादिदोषेभ्यः वेदस्याप्रामाण्यं स्वीकुर्वतां, कार्यकारणवादे अविश्वासप्रदातृणां, बृहस्पत्यनुयायिनां चार्वाकाणां मते न ईश्वरसिद्धिः। तेष्वेव एकदेशिनः केचन प्रत्यक्षसिद्धस्य राज्ञः परमेश्वरत्वमङ्गीकुर्वन्ति इति।

Notes :

---

[1] जयन्तभट्टः न्यायमञ्जरी, पृ. 3
[2] सायणमाधवः सर्वदर्शनसंग्रहः पृ. 7
[3] सायणमाधवःसर्वदर्शनसंग्रहः, पु.19
[4] जयन्तभट्टःन्यायमञ्जरी, पु.109
[5] शान्तरक्षितःतत्वसंग्रहः, पु. 520
[6] शान्तरक्षितःतत्वसंग्रहः, पु. 524
[7] तत्वसंग्रहपञ्जिका, पृ. 528
[8] गौतमः न्यायसूत्रम् 2.1.56, पु. 79
[9] सायणमाधवःसर्वदर्शनसंग्रहः, पु. 10
[10] जयन्तभट्टःन्यायमञ्जरी, पु. 108
[11] सायणमाधवःसर्वदर्शनसंग्रहः, पु.11
[12] सायणमाधवः सर्वदर्शनसंग्रहः, पु. 12

Bibliography :

1. अक्षपादः –न्यायसूत्रम्, काशीसीरीज ग्रन्थमाला, वाराणसी
2. कमलशिलः –तत्वसंग्रहदीपिका, बौद्धभारती सीरीज, वाराणसी, 1968
3. जयन्तभट्टः-न्यायमञ्जरी, चौखम्बा संस्कृतसीरीज, 1971
4. सायणमाधवः –सर्वदर्शनसंग्रहः, परिमला पब्लिकेशसन्स, अहमदाबाद्, 1981
5. शान्तरक्षितः---तत्वसंग्रहः, बौद्धभारती सीरीज, वाराणसी, 1968